संस्कृतवर्षस्मृतिग्रन्थमाला
अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनम् - 13
प्रधानसम्पादकः - वेम्पटि कुटुम्बशास्त्री

श्रीरामचन्द्रभट्टविरचितम्

# सभ्याभरणम्

## स्वोपज्ञ-मयूखमाला-टीकोपेतम्

सम्पादकः
राजेन्द्रप्रसादभट्टः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# आमुखम्

अथ विदितचरमेवैतत् समेषां यत् युगाब्दः ५१०१ (१९९९–२०००) तमो वर्षः संस्कृतवर्षः इति भारतशासनेन समुद्घोषितः आसीत्। तदनुसारं भारतशासनेन मानसंसाधनविकासमन्त्रालयेन, राष्ट्रियसंस्कृतसंस्थानेन अन्याभिश्च विविधाभिः संस्थाभिः राष्ट्रेऽस्मिन् कोणे कोणे बहवः बहुविधाश्च कार्यक्रमाः आयोजिताः अनुष्ठिता आसन्। ऐतिहासिकेन एतेन संस्कृतवर्षसमुद्घोषणेन संस्कृतज्ञानां संस्कृतप्रेमिणां संस्कृतबन्धूनां सामान्यजनानां च हृदयेषु यथोचितं संस्कृतविषयकं पुनर्जागरणं समुदभूत्। समग्रोऽपि राष्ट्रपरिवारः संस्कृतविषयकैः भावनाप्रचयैः सम्पूरितः समुत्तेजितश्च आसीत्।

ऐतिहासिकीम् आनन्दसन्दोहदां तामिमां संस्कृतवर्षस्मृतिं चिरस्मरणीयां विधातुं संस्कृतवर्षस्मृतिग्रन्थमाला इति नाम्ना त्रिशतस्य ग्रन्थानां प्रकाशनपर्यवसाना काचित् महत्त्वशालिनी योजना राष्ट्रियसंस्कृतसंस्थानेन स्वीकृता। योजनायामस्याम् अद्य यावत् अप्रकाशितानां शतस्य पाण्डुलिपिग्रन्थानां प्रकाशनम्, विविधासु भाषासु विरचितानां नैकशास्त्रसम्बद्धानाम् अभिनवानां शतस्य ग्रन्थानां संस्कृते अनूद्य प्रकाशनम्, प्रान्तभाषासु प्रसिद्धानां विविधवाङ्मयप्रक्रियारूपाणां शतस्य ग्रन्थानां संस्कृते अनूद्य प्रकाशनं च सङ्कल्पितं वर्तते।

तेष्वाद्यम् अप्रकाशित-हस्तलिखितग्रन्थप्रकाशनात्मकं सङ्कल्पं पुरस्कृत्य सम्प्रति **सभ्याभरणटीका-मयूखमाला** इत्येतद् ग्रन्थकुसुमं विकसतीति हृष्टं मच्चितम्।

संस्कृतवाङ्मये व्याकरणांशप्रतिपादकानि सन्ति बहूनि काव्यानि भट्टिकाव्य-वासुदेवविजय-सज्जनेन्द्रप्रयोगकल्पद्रुमप्रभृतीनि। सत्स्वपि एतादृशेषु बहुषु, सभ्याभरणमिति एतत् काव्यं तेभ्यः सर्वथा वैलक्षण्यं बिभर्ति। साधुवाक्यार्थबोधः, शब्दपाटवम्, शाब्दबोधचिन्तनम्, नीतिसूक्तयः इत्यादयः एतद्ग्रन्थवैशिष्ट्यस्य कतिचन-बिन्दवः।

व्याकरणबोधनोद्देशेन श्रीमता रामचन्द्रभट्टाख्य विदुषा प्रणीतमिदं काव्यम्। तेन हि सूक्तिव्याजेन श्लेषोपमादि-मौक्तिकसमन्वितेन पाणिनीय-व्याकरणशास्त्रार्थकनकेन सभ्यानामाभरणप्रायं काव्यमिदं व्यरचि इति ग्रन्भारम्भे एव कविना तेन स्पष्टीकृतम्।

# विषयानुक्रमणिका


| विषयः | पृष्ठाङ्क : |
|---|---|
| शुभसन्देशः | v |
| आमुखम् | vii |
| भूमिका | ix-xli |
| सङ्केताक्षरसूची | xlii |
| **मूलग्रन्थः** | **1—327** |
| प्रथमोल्लासः | 1 |
| द्वितीयोल्लासः | 54 |
| तृतीयोल्लासः | 108 |
| चतुर्थोल्लासः | 182 |
| पञ्चमोल्लासः | 203 |
| षष्ठोल्लासः | 221 |
| सप्तमोल्लासः | 223 |
| अष्टमोल्लासः | 288 |
| नवमोल्लासः | 317 |
| **परिशिष्टम्** | **328—335** |
| 1. श्लोकानुक्रमणिका छन्दोभिः सहिता | 328 |
| 2. व्याकरणसम्बद्धाः संस्कृतकाव्यग्रन्थाः | 336 |

**तदीयमव्ययप्रेम परिहायारुचिर्नञि।**
**ल्यपोऽशिक्षि महोदारैर्गुण एव स तादृशः ॥ 2 ॥**

अर्थ–रहितानुपसर्गान् स्वादिपदे संयोज्य यथा सार्थकान् करोति वैयाकरणस्तथैवोदारोऽपि स्वधनवस्त्रवाहनादिभिर्योजयति। डारौरसादेश इव उदारपुरुषः आत्मीयपरकीयभेदं न जानाति यथा–

**परात्मसाधारणता महोदारे महोदया।**
**डारौरसादेश इव स्वभावादेव शोभते॥ 4 ॥**

इतरेतरयोगे द्वन्द्वसमास इव स्वल्पधनेऽप्युदारजने किमप्यन्तरं न भवति। अत उदार पुरुष इतरेतर–योगाख्य–द्वन्द्वसमासस्यैव भाति। द्रष्टव्यं खलु

**अबह्वर्थेऽप्यनेकार्थसमर्पणसमुन्नतेः।**
**इतरेतरयोगे च महोदारे किमन्तरम्॥ 5॥**

## पञ्चमोल्लासः

कृपणनिन्दाख्येऽस्मिन्नुल्लासे कृपणोऽनेकार्थोऽप्येकमप्यर्थवस्तु अतिथये समर्पयन् क्लीबतां कातरतां गच्छति, अतः स समाहारद्वन्द्वेन समः कथं न भवत्यर्थाद् नूनमेव तद्वद् भवति। यथा–

**एकार्थमपि यो यच्छन्ननेकार्थोऽपि गच्छति।**
**क्लीबतां स समाहारद्वन्द्वेन न कथं समः ॥ 1 ॥**

अब्राह्मण इत्यादिना नञ्समासेन समोऽपि स कृपणः साधुरिति नोच्यते। शास्त्रे च नञ्समासः समीचीनो भवतीति वैषम्यमस्ति। कृपणाश्चादिसदृशा अनर्थकाः अश्रुतप्रत्ययप्रीता भवन्ति। **आतोऽनुपसर्गे क** इत्यादिसूत्रैर्विहिताः किदजादिप्रत्ययास्तैः समाः कृपणाः सर्वथा निर्गुणा भवन्ति। यथा–

**आश्रिताङ्गानि शुष्यन्ति यस्मिन् सत्यर्थवत्यपि।**
**स कथं न समानः स्यात् कृपणः किदजादिभिः॥ 4 ॥**

**अलं–खल्वोः प्रतिषेधयोः प्राचां क्त्वेति** प्रतिषेधवाचिनोः अलं–खलु इत्येतयोरुपपदयोः प्राचां क्त्वेव कृपणो भवति। कविरसौ विचारयति यद् व्याकरणे










**Rashtriya Sanskrit Sansthan**

56-57, Institutional Area, Janakpuri,
New Delhi 110 058